१. क्रियात्मक औषधिपरिचय-विज्ञान-विश्वनाथ द्विवेदी
२. शार्ङ्गधरसंहिता ।
३. योगरत्नाकर ।
४. औषधगुणधर्मशास्त्र -गंगाधरशास्त्री गुणे
५. रसेन्द्रचिन्तामणि
६. पारदविज्ञानीयम - वासुदेव द्विवेदी
७. रसरत्नसमुच्चय:
८. Forensic Pharmacy - B.M.Mithari
९. Text Book of Pharmacognosy - Treaso & Evans
१०. Pharmacognosy of Ayurvedic drugs - Nariyan Iyer
११. The drugs and Cosmetics Act & Rules - Govt. of India
१२. Bentley's Pharmaceutics
१३. Pharmaceutical Chemistry - M.L.Schroff

## कायचिकित्सा

१. निदानम् -

व्याधिविज्ञानोपाया:, निदानपंचकस्य सांगोपांगविवेचनम् । आयुर्वेदीय निदानपद्धतेवैशिष्ट्यं वैज्ञानिकता च । प्राचीननव्यनैदानिकपद्धतीनां तुलनात्मक: परिचय: । आधुनिकप्रचलितानां रोगनिदानपद्धतीनां प्रयोक्तव्यसाधनानां यन्त्राणामुपकरणनां परिचय: प्रयोगविधिश्च परिबोध: । क्ष-किरणादिविधीनां सम्यग्ज्ञानम् ।

रोगी-रोगपरीक्षाविधि:, त्रिविधपंचविधषड्विधाऽष्टविधदशविधातुरपरीक्षाविधि: । संस्थानिकायविकस्त्रोतोनुसारिपरीक्षाविधि:, आयुर्वेदोक्तनाडीपरीक्षा, रक्त-मूत्र-पुरीषष्ठीवन-ब्रह्मचारीत्येषां परीक्षाज्ञानं, रोगमार्गपरिज्ञानम् । प्रचलितप्रसिद्धरोगाणां निदान-सम्प्राप्तिलक्षण-भेद-साध्यासाध्यज्ञानपुरस्सरं सापेक्षरोगविनिश्चितविवेक: ।

२. सामान्यचिकीत्सा -

समस्तरोगाणां चिकित्सासूत्राणि, क्रियाक्रम:, चिकित्सासिद्धान्तविवेकश्च प्राच्यनव्यमतयो:, आद्यगिक रोगाणां च चिकित्साक्रम: ।

३. मानसरोगा: रसायनवाजीकरणे च -

मानसरोगाणां चिकित्सा: सामान्यविशेषसिद्धान्ता:, सत्वावजयचिकित्साया: वैशिष्ट्यं मानसरोगेषु प्रयुक्तौषधद्रव्याणां सम्यगवबोध: । मानसोपचारस्य विधय: प्राच्यनव्यमतयो:, यौगिकसमाधि पद्धतेवैशिष्ट्यं मानसरोगोपचारेच तदुपयोगिता ।

रसायनतन्त्र परिचय:, रसायनसेवनविधीनां परिबोध रसायनस्य जराव्याधि-प्रतिबंधकत्वं, वय:स्थापने जरानिराकरणे च प्रयुक्तानां विधीनां प्राच्यनव्यमताभ्यां परिज्ञानम्, नव्यजरातुरीयविज्ञानस्य परिचय:, दिव्यौषधद्रव्याणां कल्पास्तत्प्रयोगविधिज्ञानं च । आचाररसायनम् ।

वाजीकरणस्यादयत्वे महत्वं, वाजीकरणकर्मण: स्वरूपं, विभाग:, तदुपयोगिद्रव्याणि च । क्लैब्यध्वजभंग-व्यवायशोष-शुक्रनाशादिरोगाणां निदान-सम्प्राप्ति-चिकित्साज्ञानम् क्लीबकरणविषय: ।

४. पंचकर्मचिकित्सा -

चिकित्सायां षट्कर्माणि, पंचकर्माणि च, शोधनायानां पंचकर्मणां महत्वम्, पूर्वकर्मणो:, स्नेहस्वेदयो: परिज्ञानं, पंचकर्मणां सैद्धान्तिकं व्यवहारिकं च परिज्ञानं, पंचकर्मणां प्रभावविवेक:, संशोधनार्हरोगिरोगविवेक:, संसर्जनक्रम:, पंचकर्मोपयोगी अग्न्योपहरणीयद्रव्याणामुप-करणानां च परिज्ञानम् ।

आलोच्यग्रंथा: -


१. चरकसुश्रुतवाग्भटादीनामुपयोगिनोंशा: ।
२. माधवनिदानं मधुकोशव्याख्यासहितम् ।
३. आयुर्वेदीय व्याधि विज्ञान - यादव जी ।
४. रोगिपरीक्षाविधि: - आचार्य प्रियव्रतशर्मा
५. पंचकर्मविज्ञान - हरीदास श्रीधरकस्तूरे
६. चिकित्सादर्श - पं. राजेश्वरदत्तशास्त्री
७. कायचिकित्सा - रामरक्ष पाठक ।
८. चक्रदत्त ।
९. System of Clinical Methods - Savill
१०. Muir's Text Book of Pathology
११. Approval Laboratory Technic - Koliner
१२. Theory and Practice of Psychotherapy - Yellow
१३. Studies in Psychosometic Medicine - Benedek
१४. Karmaj Bhavayadhi Daivy Chikitsa - Pt.Kesar Dev Shastri.


...

## शल्यतन्त्रम्

### १. शल्यतन्त्रम् (सिद्धान्ताः)

शल्यतन्त्रस्यायुर्वेदे प्राधान्यम्, तस्यैतिहासिकोत्कर्षापकर्षौ, शल्यतन्त्रस्य प्राचीनसंहिताः आचार्यश्च, नव्यशल्यतन्त्रपरिचयः सेतिहासः ।

सुश्रुतमुखेन दोषधातुमलविवेकः, रक्तस्य वैशिष्ट्यं चतुर्थदोषत्वप्रतिपादनं च यूनानीमतसमीक्षणपुरःसरम्, षट् क्रियाकालाः, सर्वस्त्रोतः परीक्षणं, शल्यतन्त्रे मर्मणां महत्त्व परीक्षणं, च, शल्यतन्त्रोपदिष्टानां व्याधीनां हेतुसंप्राप्तिविवेचनम् ।

### २. शल्यकर्म (साधारणम्)

शस्त्रसाध्या व्याधयः, तेषां चिकित्साक्रमः प्राच्यनव्यमततो: । स्नेहस्वेदादि पूर्वकर्म, अगोपहरणीयानि, प्रधानकर्माणि संज्ञानाशज्ञानम् तदुपयोगिद्रव्यपरिचयश्च, विविधरोगेष्वष्ट विधशस्त्रकर्मणां प्रयोगज्ञानम् । शस्त्राणां दोषगुणाः, यन्त्रशस्त्रोपकरणानां परिज्ञानम्, व्रणबन्धनविधयः । पश्चातकर्मज्ञानम्, पथ्यापथ्यम् ।

### ३. योग्या (प्रायोगिकंव्यावहारिकं च शस्त्रकर्म)

शस्त्रकर्माभ्यासः, तदर्थं विविधप्रतिकृतीनां संरचना, शास्त्रोपदिष्ट योग्या निर्देशः, प्राच्यनव्यमततो: विविधरोगेषु निर्दिष्टानां शस्त्रकर्मणां विशदं ज्ञानम् । विशेषतो मूत्रवृद्धिअन्त्रवृद्धि-अश्मरी-अर्शोभगन्दरप्रभृत्युपयुक्तानां कुक्षिपाटन-धमनी-बन्धनादीनांच कृते शुनां मानवशवानां चोपरि सतताभ्यासः ।

### ४. अनुशल्यकर्म

क्षारतन्त्रपरिचयः, क्षारनिर्माणविधिः तदुपयोगिद्रव्याणांच परिचयः क्षारस्य व्याधिषु विधिनिषेधौ, क्षारसूत्रनिर्माणम्, भगन्दरेषु अर्शःसुच क्षारसूत्रप्रयोगविधिः । अग्निकर्म तत्प्रयोगज्ञानंच । रक्तमोक्षणस्य विविधोपायानां सिराव्यध-जलौका-श्रृंगादीनां परिचयः प्रयोगानं च ।

### आलोच्यग्रंथा :-


१. सुश्रुतसंहितायां उपयोगिनो अंशाः ।
२. Bailey & Love's Short Practice of Surgery
३. Scientific Basis of Surgery - Irvine
४. Methods of Surgical Research - K.N.Udupa
५. Text Book of Operative Surgery - Forguharson.


## शालाक्यतन्त्रम्

### ऊर्ध्वांगशारीरम्

१. शिरस उत्तमांगत्वम्, शिरःशारीरम् । नेत्ररचनाशारीरम्, मण्डलानि, पटलानि, सन्धयश्च । नासा - कर्ण - जिह्वा - दन्त - ओष्ठादीनां रचना - शारीरम् ।

प्राचीनानां शालाक्याचार्याणां तत्संहितानां च परिचयाः ।

२. नेत्ररोगचिकित्सा -

नेत्ररोगाणां निदानं, नव्यनिदानोपकरणानां च परिचयः, सन्धिकर्म - शुक्ल-कृष्ण-दृष्टि-सर्वगतानां रोगाणां नामानि, हेतवः, संप्राप्तिः, लिंगानि चिकित्सा च।

३. अन्योध्र्वांगरोगचिकित्सा

शिरः - कर्ण-नासा-मुख-ओष्ठ-जिह्वा-तालु-कण्ठगतानां रोगाणां नामानि, निदानं चिकित्सा च नव्यनिदानोपकरणविधीनां च परिज्ञानम्।

४. शालाक्यचिकित्साकर्म -

उपर्युक्तेषु रोगेषु प्रयुज्यमानानां क्रियाकल्पानां आश्च्योतनबिडालक-पुटपाक-तर्पण-अंजन-धूमपान-कवल-गण्डूष-रक्तमोक्षण-नस्य-शिरोबस्ति-इत्यादीनां निर्माण-प्रयोगविधिज्ञानम्।

शालाक्यरोगेषु प्रयुज्यमानानां शलाकादीनां नव्ययन्त्राणां च परिचयः प्रयोगज्ञानपुरःसरः।

आलोच्यग्रंथाः -

१. चरकसुश्रुतवाग्भटादीनामुपयोगिनो अंशाः।
२. System of Opthalmology - Duke & Elder
३. Disease of nose, Throat & Ear - Ballenger

प्रसूतितन्त्र स्त्रीरोगविज्ञान

१. गर्भ-गर्भिणीशारीरम्

श्रोणिगुहा-योनि-स्त्रीशरीरवैशिष्ट्यम्, गर्भाशयरचनाशारीरं, आर्तवम्, ऋतुचक्रम्, अनुयोगिनो गरसाः, स्त्रीबीजम्, गर्भाधानम्, गर्भाशयेतरगर्भाधानम्, यमलादिगर्भाः, गर्भोपादानानि, गर्भस्यषड्धात्वात्मकत्वम्। गर्भाभिनिर्वृत्तिः, मातृजादयो भावाः, गर्भाभिवृध्दिः, जननस्तराणां निर्माणं, जननस्तरैर्भ्रूणावयवानामुद्भवः। गर्भबन्धनं, गर्भधरा कला, जराध्वपराप्रभृत्यंगानां निर्माणं, तयोश्च कर्माणि। गर्भस्य पोषणम्। गर्भशरीररचनाक्रियावैशिष्ट्यम्। गर्भलिंगोत्पत्तिः, गर्भनिदानम्, गर्भस्य मासानुमासिकी वृध्दिः गर्भागसंस्थितिः, गर्भे वर्णोत्पत्तिः।

गर्भिण्यां गर्भकालीना विलक्षणता, सम्बध्दानि लक्षणानि, मातृगतांगपरिवर्तन-लक्षणानि। हीनमध्येतमबलक्षणानि, सापेक्षनिश्चितानिश्च। गर्भस्थिनिर्णयः, गर्भस्य जीवित-मृतावस्थानिर्णयः, संख्यानिर्णयः। गर्भिणीपरिचर्या, स्वस्थवृत्तश्च, गर्भिण्याः मासानुमासिकं पथ्यापथ्यंच।

...

२· प्रसूति-क्रम्

प्रसवस्य विविधावस्था:, रक्तभाव: तन्नियन्त्रणं च। गर्भनिष्क्रमणप्रकारा:, गर्भस्य विविधा गतय: प्रकृतप्रसवोक्रमा: - प्रसवस्य विविधावस्थानां कामणि-अपरा-परीक्षणं, वैकृत: प्रसव:, योनिसंवरणादय:, मूढगर्भा:, गर्भस्त्रावपातौ, गर्भिणी व्यापदस्तच्चिकित्सा च ।

आयुर्वेदानुसारेण प्रसवोत्तर:क्रम:, सूतिकागारप्रवेशविधि: विभिन्नावस्थाना-मुपक्रम:, नालच्छेदनं, बालसंगोपनं बालोपचारश्च । स्तन्यविकारा: ।

३· स्त्रीरोगा:

योनिव्यापद:, स्तनरोगा:, सामान्यरोगा:, रक्तगुल्म:, स्तनाश्रितानि गर्भाशयाश्रितानि चार्बुदानि, योनिभ्रंशा:, औपसर्गिका योनिरोगा, इति । स्त्रीजातानां रोगाणां निदानसम्प्राप्तिलक्षणपुरसराचिकित्सा । चिकित्सायां चोतरबस्ति: पिचु: वर्ति:लेप: धूपनं पावनं दहनं इत्यादया । गर्भनिरोधविधय: ।

४· प्रसूतिशल्यकर्माणि -

सामान्यशाल्यकर्म सिध्दान्तज्ञानम्, गर्भाशयमुखविस्तृतीकरणं, गर्भाशयलेखनं, अगर्भाशयमुखदहनं, स्वस्थाने गर्भाशयस्थापनमशरिनिहरणं, गर्भाशयनिर्हरणं, रक्त-गुल्मनिर्हरणं, शाल्यनिहरणं, स्तनविध्दाधिपाटनं, गर्भाशयविदार:, उदरपाटनं; मूढगर्भनिर्हरणं, गर्भपातनम्, वान्ध्याकरणम् इत्यादीनि एतदुपयोगियन्त्रशिस्त्राणां शक्वादीनां ज्ञानम् ।

आलोच्यग्रंथा :-


१· चरकसुश्रुतवाग्भटादीनामुपयोगिनौ शा: ।

२· Text Book of Obstetrics - Holland & Brouis

३· Text Book of Gynaecology - Jefcot

४· Drill's Oral Contraceptrics

५· Munro Kirls Operative Obstetrics

६· Embryology - Barth

## कौमारभृत्यम्

१. गर्भोपक्रम :

मातृज-पितृजादि भावा:, मज्ज: पुरुषीयविमर्श:, गर्भवृध्दिक्रम: गर्भस्य पोषणम्, गर्भविकारा: सहजा: विकृतिहीनाधिकावयवादय:, कुलजा: । मातृजपितृजा: विकारा:, बीज-बीजभाग-बीजभागावयवजन्या विकाराश्च : ।

२. कौमारभृत्यम् :

नवजातशिशो: प्राणानयनम्, नालच्छेदनमुल्वकनिर्हरणं गर्भोदकवमनं च, नवजातशिशो: शरीरक्रियाविज्ञानम्, नवजातशिशो: परीक्षणम्, जातकर्मसंस्कार: अन्ये संस्काराश्चा-न्नप्राशनकर्णवेधादय:, कुमारागारम्, क्रीडाभूमि:, क्रीडनकानि, नवजातशिशो:, प्राशनम्, स्तन्यसंपतस्तन्यदोषा: तेषां चिकित्सा च, धात्रीपरीक्षणम् बालानुरूपशारीरिक-मानसिकवृध्दे: परिज्ञानम्-आहार-विहारनिरूपणम्, रक्षाकर्माणि, शिशोर्वेदनाया: परिज्ञानम्, दन्तोद्भेद: दन्तसम्पत् तज्जन्यरोगाणां चिकित्सा, बालकेन सह परिवारस्येतरजनानां च सम्बन्ध:, लेहनम्, व्याधिक्षमत्वोपक्रम:, स्तन्यापनयनम्, समयपूर्वजातस्य नवजातशिशो: प्रबन्ध:, अतिकालोत्पन्ननवजातशिशो: उपक्रम: ।

३. बालरोगा :

बालशोष:, पारिगर्भिक:, फक्क: जलशीर्षकम्, अन्ये च पोषणतत्वाभावजन्या: व्याधय: तेषां निदानं चिकित्सा च ।

कुकूणकसन्निपदगुदनिरुध्दप्रकाशश्च:, गुदकुट्टम्, पोथकी, चर्मदलम्, विसर्प: क्षीरालसकम्, उल्वकरोग:, छर्दि:, बालापस्मार:, अतिसार:, बालोध्देग:, ... महापद्मरोग:, कृमिरोगा:, तालुकण्टक:, अजगल्लिका, जातहारिणी, ग्रहबाधा:, उत्फुल्लिका, रोहिणी इत्येतेषां विकाराणां चिकित्सा । नव्यदृष्ट्या विविध-बालरोगाणां परिचय: ।

४. सामान्यचिकित्सा :

औषधानां मात्रा प्रयोगविधिश्च । पंचकर्मनिषेध:, आत्ययिके व्याधौ प्रयोगविधिश्च, स्नेहस्वेदादीनां प्रयोगविधय:, पाण्डु-कामला-धनुस्तंभ-अपतानक-आक्षेपकादीनां निदानं चिकित्सा च ।

कास-श्वास-ग्रहणी-अतिसार-पक्षाघात-हृद्रोगादीनां अन्येषांच व्याधीनां रोगविज्ञानपुर:सर: सामान्यचिकित्सोपक्रम: ।

१. काश्यपसंहिताया: चरकसुश्रुतवाग्भटादीनांचोपयोगिनो शा: ।

२. Nelson's Text Book of Paediatrics

## स्वस्थवृत्तनिष्णात

प्रथम पत्रम् - रोगानुध्दनीयं सामाजिकं च स्वस्थवृत्तम् ।

सामाजिके स्वस्थवृत्ति वायो: जलस्य प्रकाशस्य देशस्य ( निवासस्थानस्य) च महत्वम् । एतेषांगुणा: दोषा:, प्राकृतं वैकृतं च स्वरूपमेषां दोष - विकृतिनिवारणोपाया: । विविधान्यप द्रव्याणि, नगरेषु ग्रामीण क्षेत्रेषु चापद्रव्यानिवारणव्यवस्था

...

सार्वजनिकशौचास्थानव्यवस्था शवोपनाशव्यवस्थायामग्निदाह· भूमौस्थापने विद्युद्दाहो वा । औद्योगिकसंस्थाने स्वास्थ्यरक्षोपाया: विद्यालयस्य स्थानं भवनं, तत्रवायो: प्रकाशस्य च व्यवस्था, आसनं, क्रीडस्थलं छात्राणां स्वास्थ्यपरीक्षा प्रभृतय: । परिवारकल्याण योजनाया आवश्यकता, उपाया: उपयोगिता वैयक्तिक - सार्वजनिकस्वास्थ्योपरितस्या: प्रभाव:, मातृशिशुकल्याणकेंद्राणि

द्वितीयं पत्रम्-औपसर्गिकरोगप्रतिषेध:

विविधा, संक्रामकरोगा: जनपदोध्वंसश्च, तेषां, सम्यग्ज्ञानं निवारणोपायाश्च, व्याधिक्षमत्वप्रकारा:, कुसंगजाश्च विविधा: रोगा: । चिकित्सालयभवनस्य स्थाने तत्र प्रकाशादिव्यवस्था च स्वास्थ्यप्रशासनस्य ज्ञानं, स्वास्थ्यप्रशासनानामधिकारा: नियमोपनियमाश्च ।

तृतीय पत्रम्-वैयक्तिकं स्वस्थवृत्त सद्वृत्तं च

आयुर्वेदीय स्वस्थवृत्तस्य प्रयोजनं महत्वं च । स्वस्थलक्षणं, सद्वृत्तं, दिनचर्या, निशाचर्या ऋतुचर्या, त्रयोपस्तम्भा: धारणीया आधारणीयावेगा:, उपवास:, विवाह:, निन्दितानिन्दिता: पुरुषा:, आहारविधिविशेषायतनानि, आहार-द्रव्याणि, विविधाहारद्रव्याणां शाकाहारमांसाहारयोश्च गुणावगुणानि, आहारमात्राविचार:, कालविचार:, विषमभोजनजन्याश्च व्याधय: । अन्याश्च वैयक्तिक. स्वस्थवृत्तसम्बंधि शास्त्रोक्तविषय: ।

योगस्य सामान्यपरिचया:, आयुर्वेदे योगप्रतिपादनं, योगद्वारा स्वास्थ्य साधन,योगस्याष्टांगानि तेषां ज्ञानम्, प्रमुखासनानां प्रयोगविधय:, षटकर्म विवेचनं योगस्य स्वास्थ्यरक्षा सम्बंधिनं उपयोगितानि: शा ।

आलोच्यग्रंथा :-

| | | |
|---|---|---|
| १· | चरक सुश्रुत वाग्भटादीना संबध्दांशा | |
| २· | स्वस्थवृत्तसमुच्चय | - वैद्य पं·राजेश्वरदत्त शास्त्री |
| ३· | स्वास्थ्य विज्ञान | - डॉ·भा·गो·घाणेकर |
| ४· | योग और आयुर्वेद | - आचार्य राजकुमार जैन |

पंचकर्मनिष्णात

प्रथमं पत्रम् - पंचकर्मोपकल्पनीय :

(क) कायचिकित्साया: सामान्यसिद्धान्त सूत्राणि, कायपदस्य चिकित्सापदस्य च निरुक्ति:, परिभाषा चिकित्सा भेदा: शोधनचिकित्सा शमनचिकित्सा च । संतर्पणापतर्पणचिकित्सा, लघनबृंहणादि षड्विधचिकित्सोपक्रमा:, चिकित्साया: सामान्यविशिष्टसिध्दान्तानां परिज्ञानम् । ...

(ख) पूर्व कर्माणि –

स्नेहनस्वेदनयो : परिभाषालक्षणप्रयोजनप्रयोगविधिभेदपुरस्सरं सम्यग्ज्ञानम् । तयो: देशकालवयमात्रासम्बन्धी विचार: । स्नेहनयोग्या: स्वेदनयोग्याश्च व्याधा: व्याधितश्च । स्निग्धास्निग्धातिस्निग्धाना स्विन्नास्विन्नातिस्विन्नानां लक्षणानि स्नेहविचार:, स्नेहद्रव्या:, स्नेहनसाधनानि, स्नेहप्रयोगे विचारणाया उपयोगिता, स्वेदनक्रियायां प्रयोज्यमानद्रव्याणां यन्त्राणां च ज्ञानम् ।

द्वितीय पत्रम् – सामान्य पंचकर्मचिकित्सा

पंचकर्मविषये चरकसुश्रुतयोर्मतभिन्नता, वमनविरेचननिरूहानुवासनशिरोविरचनानि, तेषां सम्यग्हीनातियोगानां लक्षणज्ञानं, अयोगातियोगाभ्यानुत्पन्नविकाराणां प्रतिकारज्ञानम् । उत्तममध्यमावरवेगानां विचार: । संशोधनयोग्यरोगाणां च विचार:, संशोधनकालविचार: संशोधनार्थ संभाराद्य: कक्षादिव्यवस्था च । संशोधनयोग्यपुरूषस्य बलाबलानुसारेण पंचकर्मोपयोगी औषधद्रव्याणां विचार: । संशोधनार्थ विविधोपकरणानां यन्त्राणां ज्ञानं व्यवस्था च, वमनविरेचनकल्पानां ज्ञानम् । बस्तियंत्राणां गुणादोषविचार: बस्तिप्रयोगविधिज्ञानं बस्तिकर्माणि प्रयोज्यमानमात्रादिनिरूपणम् बस्तिव्यापद्विचार: । संसर्जनक्रम:, तस्यविधि: उपयोगिता च।

तृतीय पत्रम्-पंचकर्मसाध्या: विशिष्टरोग: प्राकृतिकचिकित्सा च ।

पंचकर्मयोग्या अयोग्याश्चय के व्याधिता: । के च पंचकर्म साध्या रोग: । केषु च विशिष्ट रोगेषु पंचकर्मचिकित्सा फलवतीतिसर्व प्रतिपादनीयम् । प्राकृतिक चिकित्सायां:महत्वम् तस्या प्रमुखा सिद्धान्ता निसर्गोपचारस्य प्रयोगविधयश्च । प्राकृतिकचिकित्सासाध्या प्रमुखा रोग: । सविस्तारं सेतिहासं च प्राकृतिकचिकित्साया: स्वरूपम् । आयुर्वेदेन सह च तस्यास्तुलनात्मकमध्ययनम् ।

आलोच्य ग्रंथा:

| | | |
|---|---|---|
| १. | चरकसुश्रुतवाग्भटादीना संबद्धभागा: । | |
| २. | पंचकर्म विज्ञान | – हरिदास श्रीधरकेस्तूरे । |
| ३. | कायचिकित्सा | – वैद्य रामरक्ष पाठक । |

रसशास्त्र-भैषज्यकल्पना निकाय

प्रथम पत्रम्-रसशास्त्रपरिचय: द्रव्यपरिचयश्च

रसरसायनशास्त्रयो: प्रकरणानुसारं निरूक्ति:, रसशास्त्रस्य वैशिष्ट्यं क्रमिकेतिहासच। आकरजानां कृत्रिमाणां च रसानां स्वरूपपरिचयश्च । रसस्य पर्याया:, तस्य प्राप्तिस्थानं नैसर्गिका: कंचुकाख्याश्च दोषास्तेषां च सोपपत्तिकं ज्ञानम् । शुद्धाशुद्धरसलक्षणम् हिंगुलाद्रसाकृष्टिप्रकार: ।

...

रसमहारसोपरससाधारणरसधातूपधातुलौहरत्नोपरत्नविषोपविषादीनां परिचयाः वर्गीकरणं प्राप्तिस्थानं ग्राह्याग्राह्यास्वरूपज्ञानंच ।

रसभस्मेषु रासायनिकानां भौतिकानां च परिवर्तनानां सम्यग्ज्ञानम् । रासायनिक-संयोगवियोगप्रकाराणां ज्ञानम् । भौतिकानांरासायनिकानां च मिश्रणानां ज्ञानम् । क्षाराम्ललवणानां सामान्यपरिचयाः, परीक्षणविधयश्च । द्रव्यगणकानां परिज्ञानम् ।

द्वितीय पत्रम्-रसशास्त्रम्

रसेन देहलौहसिद्धिः रसस्यसामान्यशोधनप्रकाराः, अष्टसंस्काराणामष्टादश-संस्काराणां च व्यावहारिकं ज्ञानम् । रसस्य विविधगतीनां बन्धविशेषाणां च ज्ञानम् । रसस्य मूर्च्छनाप्रकाराणां जारणाप्रकाराणां च व्यवहारिकं ज्ञानम् ।

रसशास्त्रोक्त साधारणरसमहारसोपरसधातुपधातुलौहरत्नोपरत्न विषोपविषादीनां शोधनं मारणमामयिकप्रयोगाश्च । विशिष्टरसयोगानां च निर्माणविधिज्ञानमामयिक-प्रयोगाश्च ।

तृतीयं पत्रम् - भैषज्यकल्पना -

स्वरसादिपंचविधकषायकल्पनानां विविधभेषजाहारकल्पनानां च परिचयः निर्माण-विधयश्च शोषणं वाष्पीकरणं सुगन्धीकरणं स्फटीकिकरणमित्यादिविधीनां समीचीनं ज्ञानम् ।

औषधनिर्माणोपयोगिनी यन्त्रमूषाकोष्ठीपुटादीविविधोपकरणानां परिचयाः प्रयोग ज्ञानंचा प्रचलितप्रमुखरसरसायनयोगानां निर्माणज्ञानम् ।

रसायनशालानिर्माणोपकरणानि, भेषजागारं भेषजसंग्रहसंचयसंरक्षणविधिनां परिचयः फार्मेसीसम्बन्धीश्रमनियमाः, लाइसैंसपद्धतिः, प्रचलितानां च नियमोप नियमानां परिज्ञानम् । फार्मेसीसम्बन्धी अर्थशास्त्रीव्यवस्था औद्योगिकदृष्टया च भेषजनिर्माणज्ञानम् ।

आलोच्यग्रंथा -

१. रसरत्न समुच्चय
२. रसतंरगिणी
३. शार्ङ्धरसंहिता
४. भैषज्यरत्नावलि
५. रसामृत (यादव जी)
६. सिद्ध योगसंग्रह (यादव जी)
७. परिभाषा खण्ड (यादव जी)

...

## अगदतन्त्रव्यवहारायुर्वेद विषणात

### प्रथमं पत्रम्-विषपरिचयविज्ञानम् -

विषस्यव्याख्या सामान्यवर्णनं च । विषस्य गुणाः, कथं ते ओजसो विपरीत? किं नाम स्थावरविषम्? तस्याश्रयाः भेदपुरस्सरं सविस्तारं समीचीनं ज्ञानम् । स्थावरविषस्य प्रकाराः वेगाः असाध्यलक्षणानि च । किं नाम जंगमविषम्? जंगमविषाश्रयाः, सर्पाणां प्रमुखजातयस्तेषां वर्णनं विभेदं च । सर्पाणां दंशहेतुः दंशप्रकाराः दंशस्य सामान्य-कालः । सर्पविषम्, सर्पदंशस्य बाह्यलक्षणानि असाध्यलक्षणानि च । शंकाविषस्य लक्षणानि उपाधयश्च: विषस्य कृत्रिमाकृत्रिमभेदाः कृत्रिम गरविषम् । नवीनविषत-त्रीधता अभिनवीयविधकृतीम विषप्रकारः । विषदातालक्षणानि विषजुष्टान्नपानलक्षणानि कथं विषं जीवितं हरतीति?

### द्वितीयं पत्रम्-विष चिकित्सा विज्ञानम्

विविधैः स्थावरजंगमविषैः पीडितानां रुग्णानांसामान्या विशिष्टा च चिकित्सा । विविधानामगदानां निर्माणविधि प्रयोगज्ञानं च ।

अर्वाचीनं विषतन्त्रमनुसृत्यविषलक्षणं, प्रभावः क्रियाश्च । तीव्रविषाणांलक्षणा-मनुसृत्य विषपरिचयश्चतुस्त्रिंशत (३४) भेदा, विषप्रवेशमार्गाः, अचेतनस्य पुरुषस्य परीक्षणं, विषक्रियायाः प्रभाव कारिण्यो व्यवस्थाः गंधकाम्लादीनि दाहकविषाणि, सोमल (आर्सोनिक अंजन (एण्टीमनी) पारदप्रस्फुरकादिनी विक्षोभकविषाणि, अहिफेन-वेलाडोनाएट्रोपिनधत्तूरादीनि स्नायविकविषाणि, हृदये प्रभावकारणानि वात्सना-भादि विषादी, वाष्पीयविषाणि, जांगमानि च विषाणि । भोजनविषम्, प्राणी-विषम्, अन्तर्विषोत्पत्तिः (टोमेन्स) वातबलासकः (वेरीवेरी) कृष्णाबीजानि (कालादाना) जैविय निशोत्तरं प्रभृतयः

### तृतीयं पत्रम - व्यवहारायुर्वेद :

न्यायवैद्यकशब्दस्यव्याख्या तत्प्रयोजनं च । अपराधः दण्डःअपराधनामपवादाश्च । न्यायालयास्तेषां कार्यपद्धतिश्च? साक्षिविषयकं विवरणानियमाश्च । मृत्योरवस्था-/सन्मात्मश्च प्रकारत्रयमूर्च्छाश्वासावरोधः/आकस्मिमृतयोः कारणानि, मृत्योः पश्चात् वेशी संकोचस्तत्विषयक ज्ञातव्यं कारणानि । विदग्धावस्थायां प्रभावशालिन्योवस्थः । न्यायविषयकः प्रश्नः, लक्षणानि, मरण-प्रमाणपत्रम् समयः शवच्छेदपरीक्षणं प्रभृतयः ।

### ग्रंथाधार :-


१. चरकसंहितः चिकित्सास्थाने २३ तमो ध्यायः ।
२. सुश्रुत संहितायाः कल्पस्थानं समग्रम् ।
३. अष्टांगहृदयस्यो त्तरतंत्रे ३५,३६,३७,३८ तमा अध्यायाः ।


...

आलोच्यग्रंथा:

१. सद्व्यवहारायुर्वेदपमृत्युविज्ञानम् (श्री गणेश कृतम्)
२. न्यायवैद्यकम् (अग्निदेव कृतम)
३. व्यवहारायुर्वेद विषविज्ञान-आदर्श (युगल किशोर गुप्ता डॉ॰रमानाथ द्विवेदी)

रसायन वाजीकरण निष्णात

प्रथम पत्रम्-संशोधन कर्म

रसायनवाजीकरणार्थं संशोधनकर्मणः महत्वम् । संशोधनकर्माणि तेषां पृथक्-पृथक् समीचीनं ज्ञानम् । संशोधनकर्मसुप्रयुज्यमानान्युपकरणानि द्रव्याणि च । संशोधनार्हाः, संशोधनानर्हाश्च । संशोधनविधिः, संशोधनफलं ।

द्वितीय पत्रम्-रसायनम्

रसायनस्य निरुक्तिः परिभाषाः पर्यायाः प्रयोजनमैतिहासिकं च महत्वम् । विविध रसायनतन्त्राणां परिचयः । कुटीप्रवेशिकवातातपिक भेदेन रसायनप्रयोगः । कल्पप्रयोगज्ञानमाचार रसायनं सद्वृत्तं ब्रह्मचर्यादीनां रसायनयोगास्तेषां प्रयोगविधयश्च । कुटीप्रवेशिकस्य विधिः पूर्वकर्मः, कुटीप्रवेशः, प्रवेशानन्तर च संयमेनाचरणाम कुटीप्रवेशिकस्याऽशोऽफलम कोतोदित पर्यन्त कुटीप्रवेश आवश्यकत्वस्य का चर्या? कुटयाः बहिर्गमने नियमाः । रसायनमात्रानिर्धारणं रसायनाधिकारिणः अवस्थानुसारंच मात्राभेद इत्यादि ज्ञानम् । रसायनसेवनान्तरंप्राकृताहारविहारसेवनम् । रसायनोयोग्यकालाः रसायनयोग्यपुरुषः । वातातपिकरसायनं कैः सदासेवनीयं तस्य विधानंच । रसायनद्वारा व्याधिक्षमत्वप्रतिपादनं जराव्याधिप्रतिबंधकत्वं चातुरैरनातुरैर्वा, सेवनीयाः विविधाः रसायनप्रयोगाः ।

तृतीयपत्रम-वाजीकरणम्

वाजीकरणस्य निरुक्तिः लक्षणं परिभाषा पर्यायाः महत्वं प्रयोजनं फलमैतिहासिकं च महत्वम् । वाजीकरणं केन कदाच सेव्यम् । स्त्रीप्रशंसा, स्त्रीलक्षणं निरपत्यस्य निन्दा, वाजीकरणविधः पूर्वकर्म वाजीकरणयोगास्तेषां सेवनविधिः मात्रा च । फलवच्छुक्रलक्षणं शुद्धशुक्रार्तवलक्षणानि शुक्रदोषास्तेषां निर्हरणोत्पायाः शुक्रवृद्धिप्रकार उपयोगाः शुक्रमात्रवृद्धिलक्षणानि शुक्रवृद्धिकराश्च भावाः बलवर्धनप्रकाराः अपत्यकराणां योगानां परिचयः । वाजीकरणप्रक्रियाद्वारा व्यक्तायसामर्थ्य वाजीकरणसेवनानन्तरं मैथुनाद् प्राक्पश्चाच्चापि सेवनीयम् । क्लैव्यवर्णनं प्रसंगे ध्वजभंगव्यवायशोषं शुक्रशीघ्रपतनारसंग निवृत्तिप्रभृतिरोगाणां शुक्रवहस्त्रोतसां च रोगाणां परिचयस्तत्र प्रयोज्यानां वाजीकरणद्रव्याणामाहारादि परिचयाः । वर्तमानसन्ततिनिरोधान्दोलनसमये वाजीकरणस्य का उपयोगिता प्रभृतयः ।

...

आलोच्य ग्रंथा:-

१. चरकसंहितायाः चिकित्सास्थाने प्रथमो द्वितीयश्चाध्यायौ ।
२. चरकसुश्रुतयोः संबध्दाशाः ।

## विकृतिविज्ञान निष्णात

## प्रथमं पत्रम्-प्रयोगिक शारीरमरिष्टविज्ञानं च

शारीरोत्पत्तिविचारः, सिराधमनीस्त्रोतोविचारः, मर्मविचारः, कोष्ठकोष्टांग-रचनाविचार, अग्निविचारः, अन्य सम्बन्धितानामवयवरसव्यानीज ज्ञानेन्द्रियमनः भावनामपिक्रिया । वैशिष्ट्यविचारश्च ।

अरिष्ट विज्ञानस्य महत्वं वैशिष्ट्यंच । अरिष्टविज्ञानानुसार तुरगतिविकासिनां वैज्ञानिकं विवेचनम् । अरिष्टविज्ञानान्तर्गतछाया प्रभादि भावानां समीचनं ज्ञानम् ।

## द्वितीयं पत्रम्-विकृतिविज्ञानं धातुमलादिपरीक्षण विज्ञानं च

(क) दोषत्रयाणां वृद्धिक्षयलिंगानि सामनिरामदोषधातुमलानां लिंगानि,दोषावरणा दोषप्रकोपणानि, त्रिकोष्ठ वैकारिकावस्थाभिः सह सम्बन्धः रोगाणां सम्प्राप्ति-निमणिं तस्य कारणत्वं, आधुनिककीटाणुवादसिध्दान्तेन सह तस्य समन्वयात्मकं चाध्ययनम् । रसादिधातूनां स्वेदादिमलानां च वैकारिका अवस्था वृद्धिक्षयकारणानि लिंगानि तज्जाश्च विकाराः । आगन्तुजानां निजरोगाणां च पारस्परिकसम्बन्धः दोषाणां विविधाः अवस्था संचयप्रकोपादिषट्क्रियाकालाः । व्याधिदोषयोः व्याधिदुष्टयोश्च विवेचनं, सामान्याः नानात्मजाश्च विकाराः, स्त्रोतो दुष्टयस्त-ज्जाश्च विकाराः, त्रिविध रोगमार्गाः ।

(ख) व्याधि विज्ञानोपयाः, निदानपंचकस्य सांगोपांगविवेचनमायुर्वेदीयनिदानपद्धतेविशेषं वैशिष्ट्यं वैज्ञानिकता च । प्राचीननव्यनैदानिकपद्धतीनां तुलनात्मकः परिचयः । आधुनिकप्रचलितानां रोगनिदानपद्धतीनां प्रयोक्तव्यसाधनानां यन्त्राणामुपकरणांनां स्वसां परिचयः । प्रयोगविधिज्ञानं च । क्ष्तपरीक्षण ("क्ष" किरणादिविधीनां सम्यग्ज्ञानम् । रोगीरोगपरीक्षाविधीः, त्रिविधषड्विधाष्टविधदशविधातुरपरीक्षा-विधयः । आयुर्वेदोक्तनाडीपरीक्षाविधेसमीचीनं ज्ञानम् । रक्त-मूत्र-मल-शुक्रष्ठीवन मस्तिष्कसुषुम्नागततर्पककफ-हृद्वारि इत्येषां भावानां परीक्षाज्ञानम् ।

## तृतीयं पत्रम्-जीवाणुविज्ञानम्

सूक्ष्मप्राणि (वेक्टेरिया-पैरा साइट्स) विज्ञानम् । रोगोत्पादकानां सूक्ष्म-जीवाणूनां जीवनचक्र वर्धनशीलता पार्थक्यं रोगकारिताज्ञानं च ।

...

मुख्यत: पायोजिनक्कोकोई (पूयोत्पादक जीवाणु:) श्वसनकज्वर (न्युमोनिया) यक्ष्माकुष्ठ-विसूचिका (कालरा) पुनरावर्तकज्वर रोहिणीमलेरियादि रोगाणामत्रिगतानां च रोगाणामुत्पादकानां जीवाणूनां ज्ञानम् । अन्यानां पराश्रयी जीवाणूनां च सम्यग्ज्ञानम् ।

आलोच्य ग्रंथा:-

| | | |
|---|---|---|
| १. | व्याधि विज्ञान | – यादव जी |
| २. | माधव निदान (मधुकोष व्याख्या सहित) | – |
| ३. | कायचिकित्सा (प्रथम भाग) | – रामरक्ष पाठक |
| ४. | चरक संहिता | – निदान – इन्द्रियस्थाने |
| ५. | चरकसुश्रुतवाग्भटादीनां संबद्धभागा: । | |

## नेत्ररोग निष्णात

### प्रथमं पत्रम् – नेत्रशारीरम्

शालाक्यतन्त्रस्य निरुक्ति:, इतिहास: तन्त्राणि आचार्याश्च । उर्ध्वांगस्येव शिरस: महत्वं (उत्तमांगत्वम्) नेत्ररचनाशारीरं, नेत्रस्य प्रमाणं, पांचभौतिकत्वं, इन्द्रियस्येण चक्षुष: महत्वं:, दृष्टिप्रमाणं, मण्डलानि, पटलानि सन्धयश्च । नेत्र-क्रियाविज्ञानं प्राचीनार्वाचीनपध्दत्या च नेत्ररक्षाविज्ञानम् । नेत्रयो: नेत्ररोगाणां च विविधा: प्राचीनार्वाचीनपरीक्षाविधय: नेत्ररोगेषु निदानार्थं प्रयुज्यमानानामुप कारणानां विधीनां च सम्यग् ज्ञानम् ।

### द्वितीयं पत्रम् – नेत्ररोगनिदानम्

नेत्ररोगाणां संख्या प्रकारा: सामान्यहेतव: लक्षणानि च ।

नेत्ररोगाणां निदानं सम्प्राप्ति: लक्षणानिच ।

सन्धिगतानां रोगाणां संख्या निदानं लक्षणानि च ।

वर्त्मगतानां रोगाणां संख्या नामानि हेतु: सम्प्राप्ति: लक्षणानिच ।

शुक्लगतानां रोगाणां संख्या नामानि हेतु: सम्प्राप्ति: लक्षणानिच ।

कृष्णगतानां रोगाणां संख्या नामानि हेतु: सम्प्राप्ति: लक्षणानिच ।

सर्वगतानां रोगाणां संख्या नामानि हेतु: सम्प्राप्ति: लक्षणानिच ।

### तृतीयं पत्रम्-नेत्ररोगचिकित्सा –

नेत्ररोगाणां समान्या विशिष्टा च चिकित्सा ।

उपर्युक्त रोगेषु विविधा: क्रियाकल्पा: – आश्च्योतनं विडलक: पुटपाक: तर्पणांजनानि प्रभृतय: ।

...

नेत्ररोगेषु शल्यकर्मणः प्रयोगिकं ज्ञानम् ।

आलोच्यग्रंथा :-

| | | |
|---|---|---|
| १. | शालाक्यतन्त्र | - वैद्य रमानाथ द्विवेदी । |
| २. | अभिनवनेत्रचिकित्साविज्ञान | - वैद्यविश्वनाथ द्विवेदी । |
| ३. | नेत्ररोग विज्ञान | - हंसराज । |
| ४. | नेत्रचिकित्सा विज्ञान | - डॉ.मुंजे । |
| ५. | चरकसुश्रुत वाग्भटादीनां संबध्दाग्रा | |

प्रसूतितन्त्रनिष्णात

प्रथमं पत्रम् गर्भिणीशारीरम्

गर्भाशयरचनाशारीरं, गर्भस्योपदानानि, गर्भस्य षड्धात्वात्मकत्वम् । गर्भाभिनिवृत्तिः, गर्भाभिवृद्धिः, भ्रूणस्य बाह्यमध्याभ्यन्तरभेदेनात्रिविधस्तराणां निमर्णिज्ञाम् । गर्भस्थापनाविधिः, गर्भलिंगोत्पत्तिः गर्भिण्या आहाराचारविधवर्णनं तत्र युक्तयश्च । गर्भस्य मासानुमासिका वृद्धिस्तत्र प्रयोज्या योगाश्च । गर्भगर्भस्थितिः गर्भस्य गौरकृष्णादिसम्पत्तौ युक्तिः ।

गर्भिण्याः शरीरे गर्भकालीनानां परिवर्तनानां लक्षणानां ज्ञानम् । गर्भिण्याः हीनमध्योत्तमबललक्षणानि तद्नुसारमहाराचारविधानं च । गर्भविनिर्णयः, गर्भस्य जीवितावस्थायाः मृतावस्थायाश्च ज्ञानप्रकार । गर्भिणीपरिचर्या स्वस्थवृत्तं, गर्भिण्याः मासानुमासिकं पथ्यापथ्यम् । गर्भस्य यमलादिसंख्याज्ञानप्रकारः, गर्भोदकस्त्रावपातयोः लक्षणानि ।

द्वितीयं पत्रम्-प्रसवविज्ञानम् (प्रसूति तन्त्रम्)

भ्रूणस्य प्रसवकालिकाना निविधावस्थाना परिचयः गर्भिणीशरीरे सद्यः प्रसवकालिकानां तासां तामासमवस्थानां ज्ञानम् । प्रसवकाले गर्भस्य विविधगतयः, प्रकृतप्रसवोपक्रमाः, प्रसवस्य विविधावस्थासु कर्माणि, गर्भिण्याः आवीनां परिचयः तत्र च प्रयुज्यानां भेषजानां ज्ञानम् । अपरापरीक्षणं अपरा मुक्तकर्भाशयचिन्हानि ।

आयुर्वेदानुसारं प्रसवक्रमः, सूतिकागारवर्णनं तत्र च प्रवेश विधिः । सूतिकायाः विभिन्नवस्थानामुपक्रमाः नालच्छेदनप्रकारः, अपराघातनविधिः, आत्मयिकेद्यायां निद्राकरणमिमोश्रप्रयोगज्ञानम् । बालसंगोपनं, बालोपचारः, बालकण्ठगतानां गर्भम्मता निस्सारणोपायाः ।

तृतीय पत्रम्-स्त्री रोगाः

गर्भाशयमुखविस्तृतिकरणं, गर्भाशयलेखनं, गर्भाशयमुखदहनं, विटपच्छेदः, स्वस्थाने गर्भाशयास्थानं, अर्शोनिर्हरणं/शल्य निर्हरणं, स्तनविद्राधिपाटनं, व्रणचिकित्सा, मूलगर्भाहिनहरणं प तदुत्तरकर्माणि च ।

/ गुल्मनिर्हरणं

...

योनिव्यापत् रोगाः, स्तनरोगाः, सामान्यरोगाः, रक्तगुल्मः, स्तनाश्रितानि गर्भाशयाश्रितानि चार्बुदानि, विविधार्बुदानां विज्ञानोपयाः, चिकित्सा च । समान्यतः स्त्रीषु जायमानानां रोगाणां चिकित्सायां उत्तरबस्तिः, पिचुः वर्तिः लेपः, धावनं दहनमित्यादिविविधकर्मणां ज्ञानम् ।

आलोच्यग्रंथाः :

| | | |
| --- | --- | --- |
| १. | चरकसुश्रुत वाग्भटादीनां संबद्धभागाः | |
| २. | प्रसूतितन्त्र | – रमानाथ द्विवेदी |
| ३. | अभिनव प्रसूतितंत्र | – दामोदर शर्मा गौड |
| ४. | अभिनव स्त्रीरोगविज्ञान | – राजेंद्रप्रकाश भटनागर |
| ५. | Ante Natal Care | – Browne |
| ६. | Text Book of Obstetrics | – Queem Charlottee |
| ७. | Pathology | – Nevik |
| ८. | Gynaecology | – Shaw. |

## कौमारभृत्यविज्ञान

प्रथम पत्रम् गर्भोपक्रमः

गर्भाशयरचनाशारीरं, गर्भस्योपादानानि, गर्भस्य षड्धात्वात्मकत्वम् । गर्भाभिनिर्वृत्तः, गर्भाभिवृद्धिः भ्रूणस्य बाह्यस्थ्यनन्तरभेदे त्रिविधस्तराणां निर्माणज्ञानम् । गर्भस्यापोषणविधिः, गर्भाशयान्तः कलापरिचयः, गर्भाशय जरायुनिर्मितिक्रमः तत्कर्माणि च । गर्भस्यपोषणप्रकारः गर्भलिंगोत्पत्तिः गर्भिण्या आहाराचार-विविधवर्णनं तत्र युक्तयश्च । गर्भस्य मासानुमासिका वृद्धिस्तत्र प्रयोज्य योगाश्च । गर्भगर्भस्थितिः गर्भस्य गौरकृष्णादिसम्पत्ती युक्तिः ।

द्वितीय पत्रम्-कौमारभृत्यम्

(क) कौमारभृत्यम्-लक्षणं, व्याख्या व्याप्तिः महत्वं च । सद्योजात-जातमात्र नवजातबालक परिचर्या बाह्यावस्थायां क्षीरपक्षीरान्नादप्र, भृतयोग वस्थास्तदनुसाः आहारः सात्म्यमसात्म्यं च । कुमारागारम्, क्रीडाभूमिः, क्रीडनकानि, संस्काराः, वर्णविधप्रभृतयः । धात्रीपरीक्षा स्तन्यपरीक्षा, स्तन्यविकल्पं, स्तन्यशोधनप्रकाराः स्तन्जाः बालरोगास्तेषा लक्षणानिचिकित्सा च । बालस्योपवेशनमन्नप्राशनकालः पदाभ्यां गमनकालः, क्षीरान्नादः दन्तोद्भवः दन्तसम्पद् द्वंत दोषाः दन्तोद्भवजव्याधयस्तेषां प्रतिकारश्च ।

(ख) विविधाः बालग्रहाः ग्रहजुष्टबालकानां लक्षणानिशमनोपायाश्च ।

...

तृतीयं पत्रम-बालरोगचिकित्सा-

(क) मृतजातः, उपकण्टकं, नागोदरं, लीनगर्भः, जातमात्रमृत्यु, विविध सहजव्याधयः, प्रसवकालीनाः व्याधयः, प्रसवोत्तरव्याधयः, क्षीरपक्षीरान्नाद अन्नादकालीना व्याधयस्तेषां निदानलक्षणपुरस्सरा चिकित्सा ।

(ख) क्रियात्मकम् -

मूलमूत्रपरीक्षा, मार्गधातुपरीक्षा, रक्तपरीक्षा प्रकृति - विकृतितः स्तन्यपरीक्षा, धात्रीपरीक्षा शास्त्रकर्माणि च ।

आलोच्यग्रंथा :-

१. काश्यप संहिता
२. चरकसुश्रुताष्टांगहृदस्य संबध्दाः
३. कौमारभृत्य
४. रघुवीर प्रसाद त्रिवेदी ।

---

गवळी
२८३८९

[3098 - 28] 28